TARKABHASA

क ) अधोलिखितेषु प्रश्नेषु समुचितम् उत्तरं ददातु ( संस्कृतभाषया देवनागरीलिप्या च )।
10

१) करणकारणयोः स्वरूपं भेदञ्च निरूप्य कार्यत्वं निरूपयन्तु भवन्तः ।

२) समवाय्यसमवायिनिमित्तकारणानां निरूपणं कुरुत ।

३) अयुतसिद्धि निरुप्य, घटस्य घटनात् रूपादिकं प्रति समवायिकारणत्वं साधयन्तु ।

४) तर्कभाषासम्मतं कारणलक्षणं किम् ? कार्यानुकृतान्वयव्यतिरेकि कारणम् इति कारणलक्षणं युक्तमयुक्तं वेति तर्कभाषादिशा विचार्यताम् ।

५) कस्तावत् सन्निकर्षः ? सोदाहरणं सन्निकर्षविभागः आलोचनीयः।

६) का साक्षात्कारिणी प्रमा? सा च कतिधा ? तस्याः करणत्रयं सोदाहरणं विचार्यताम् ।

७)तर्कभाषाकारकृतमनुमानलक्षणं व्याकुर्वन्तु ।

८) अनधिगतार्थगन्तृप्रमाणमिति प्रमाणलक्षणं निरस्य ,

प्रमायाः करणेषु प्रमातृप्रमेयादिकानां करणत्वं कथं नेति विशदयन्तु ।

ख) संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या । 8

१) साधकतमं करणम् ।

२)यथार्थानुभवः प्रमा ।

३) तज्जन्यस्तज्जन्यजनकोऽवान्तरव्यापारः ।

४) साक्षातकारिप्रमाकरणं प्रत्यक्षम् ।

५) सविकल्पकं नामजात्यादियोजनात्मकं डित्थोऽयं ।

६) तानि च प्रमाणानि चत्वारि। तथा च न्यायसूत्रम्।

ग) अधोलिखितेषु विषयमाश्रित्य टीका कार्या।  3*2=6

प्रमा , अन्यथासिद्धः , अयुतसिद्धः , प्रत्यक्षम् , समवायीकारणम् ,

अन्ययव्यतिरेकि , अनुवन्धचतुष्टय ,असमवायीकारणम्।

इन्दियार्थसन्निकर्ष ,निर्विकल्पकप्रत्यक्षम् ,निमित्तकारणम्,